श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीता

# ॥ श्री गोपालविंशतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गोपालविंशतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

वन्दे बृन्दावनचरं वल्लवीजनवल्लभम्।
जयन्तीसंभवं धाम वैजयन्तीविभूषणम् ॥ **1** ॥

वाचं निजाङ्करसिकां प्रसमीक्षमाणो
    वक्त्रारविन्दविनिवेशितपाञ्चजन्यः।
वर्णत्रिकोणरुचिरे वरपुण्डरीके
    बद्धासनो जयति वल्लवचक्रवर्ती ॥ **2** ॥

आम्नायगन्धिरुदितस्फुरिताधरोष्ठम्
    आस्राविलेक्षणमनुक्षणमन्दहासम्।
गोपालडिम्भवपुषं कुहनाजनन्याः
    प्राणस्तनन्धयमवैमि परं पुमांसम् ॥ **3** ॥

आविर्भवत्वनिभृताभरणं पुरस्तात्
    आकुञ्चितैकचरणं निभृतान्यपादम्।
दध्ना निमन्थमुखरेण निबद्धताळं
    नाथस्य नन्दभवने नवनीतनाट्यम् ॥ **4** ॥

हर्तुं कुम्भे विनिहितकरः स्वादु हैयङ्गवीनं
    दृष्ट्वा दामग्रहणचटुलां मातरं जातरोषाम्।
पायादीषत् प्रचलितपदो नापगच्छन् न तिष्ठन्
    मिथ्यागोपः सपदि नयने मीलयन् विश्वगोप्ता ॥ **5** ॥

व्रजयोषिदपाङ्गवेधनीयं मधुराभाग्यमनन्यभोग्यमीडे।
वसुदेववधूस्तनन्धयं तत् किमपि ब्रह्म किशोरभावदृश्यम्॥ **6**॥

परिवर्तितकन्धरं भयेन स्मितफुल्लाधरपल्लवं स्मरामि।
विटपित्वनिरासकं कयोश्चित् विपुलोलूखलकर्षकं कुमारम्॥ **7**॥

निकटेषु निशामयामि नित्यं निगमान्तैरधुनाऽपि मृग्यमाणम्।
यमळार्जुनदृष्टबालकेळिं यमुनासाक्षिकयौवनं युवानम्॥ **8**॥

पदवीमदवीयसीं विमुक्तेः अटवीसंपदमम्बुवाहयन्तीम्।
अरुणाधरसाभिलाषवंशां करुणां कारणमानुषीं भजामि॥ **9**॥

अनिमेषनिषेवणीयमक्ष्णोः अजहद्यौवनमाविरस्तु चित्ते।
कलहायितकुन्तळं कलापैः करणोन्मादकविभ्रमं महो मे॥ **10**॥

अनुयायिमनोज्ञवंशनाळैः अवतु स्पर्शितवल्लवीविमोहैः।
अनघस्मितशीतळैरसौ माम् अनुकम्पासरिदम्बुजैरपाङ्गैः॥ **11**॥

अधराहितचारुवंशनाळाः मकुटालम्बिमयूरपिञ्छमालाः।
हरिनीलशिलाविभङ्गनीलाः प्रतिभाः सन्तु ममान्तिमप्रयाणे॥ **12**॥

अखिलानवलोकयामि कालान् महिळाधीनभुजान्तरस्य यूनः।
अभिलाषपदं व्रजाङ्गनानाम् अभिलापक्रमदूरमाभिरूप्यम्॥ **13**॥

हृदि मुग्धशिखण्डमण्डनो लिखितः केन ममैष शिल्पिना।
मदनातुरवल्लवाङ्गनावदनाम्भोजदिवाकरो युवा॥ **14**॥

महसे महिताय मौळिना विनतेनाञ्जलिमञ्जनत्विषे।
कलयामि विमुग्धवल्लवीवलयाभाषितमञ्जुवेणवे॥ **15**॥

जयति ललितवृत्तिं शिक्षितो वल्लवीनां
शिथिलवलयशिञ्जाशीतळैर्हस्तताळैः।

अखिलभुवनरक्षागोपवेषस्य विष्णोः
अधरमणिसुधायामंशवान् वंशनालः ॥ **16** ॥

चित्राकल्पः श्रवसि कलयन् लाङ्गलीकर्णपूरं
बर्होत्तंसस्फुरितचिकुरो बन्धुजीवं दधानः।
गुञ्जाबद्धामुरसि ललितां धारयन् हारयष्टिं
गोपस्त्रीणां जयति कितवः कोऽपि कौमारहारी ॥ **17** ॥

लीलायष्टिं करकिसलये दक्षिणे न्यस्य धन्याम्
अंसे देव्याः पुळकरुचिरे सन्निविष्टान्यबाहुः।
मेघश्यामो जयति ललितो मेखलादत्तवेणुः
गुञ्जापीडस्फुरितचिकुरो गोपकन्याभुजङ्गः ॥ **18** ॥

प्रत्यालीढस्थितिमधिगतां प्राप्तगाढाङ्कपाळिं
पश्चादीषन्मिलितनयनां प्रेयसीं प्रेक्षमाणः।
भस्त्रायन्त्रप्रणिहितकरो भक्तजीवातुरव्यात्
वारिक्रीडानिबिडवसनो वल्लवीवल्लभो नः ॥ **19** ॥

वासो हृत्वा दिनकरसुतासन्निधौ वल्लवीनां
लीलास्मेरो जयति ललितामास्थितः कुन्दशाखाम्।
सव्रीडाभिस्तदनु वसने ताभिरभ्यर्थ्यमाने
कामी कश्चित् करकमलयोरञ्जलिं याचमानः ॥ **20** ॥

इत्यनन्यमनसा विनिर्मितां वेङ्कटेशकविना स्तुतिं पठन्।
दिव्यवेणुरसिकं समीक्षते दैवतं किमपि यौवतप्रियम् ॥ **21** ॥

॥ इति श्री गोपालविंशतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥